हनीव्रतम् । गर्भहा च यथावर्णं तथात्रेयीनिसूदकः” या० । आत्रेयीयमिति ज्ञात्वा तस्या वधे तु ब्रह्महत्याव्रतद्विगुणव्रतम् कार्य्यम् ब्रह्महत्याव्रतमुक्त्वा “एवं तु समभिज्ञातामात्रेयीं वा निपातयेत् । द्विगुणा ब्रह्महत्या वै आत्रेयीनिधने भवेत्”भा०शा०प० १६५ अ० उक्तेः। अश्वादि० भरद्वाजार्थे फञ् । आत्रेयायणः भारद्वाजरूपे तद्गोत्रजे पुंस्त्री०। छागलशब्दात् आत्रेयार्थे अण्। छागल आत्रेयः अन्यःछागलिः सि०कौ०। आत्रेयी+स्वार्थे कन् ।आत्रेयिका ऋतुमत्यामृतुस्नातायां स्त्रियाम् स्त्री ।

**आथर्वण** पु०अथर्वणा मुनिना दृष्टो वेदः अण् आथर्वणः तमधीते वेत्ति वा पुनः अण् । १अथर्ववेदज्ञे ब्राह्मणे, आथर्वणिकस्य धर्म आम्नायो वा अण् इकलोपश्च । २अथर्ववेदिधर्मे ३तदाम्नाये च । अथर्वाणं वेदमधीते वेत्ति वा अण् । ४अथर्ववेदस्याध्येतरि ५वेत्तरि च तत्कल्पज्ञातरि ६पुरोहिते पु० । तेषां समूहः अण् । ७अथर्वसमूहे न० । अथर्वणा प्रोक्तमधीयते अण् तस्य तु बहुषु लुक् । अथर्वाण इत्येव । अथर्व्वणि विहितं कर्म अण् । अथर्ववेदविहिते ८अभिचारादौ कर्मणि न “आथर्वणेन हन्ता च” स्मृतिः ९तत्तत्ये कर्म्ममात्रे च “अग्नौ साक्षिण्याथर्वणेन विधिनाऽर्य्यमणम्” दशकुमा०।

**आथर्वणिक** त्रि० अथर्व्वाणं वेदमधीते वेत्ति ठक् दाण्ड्या० नि० । अथर्ववेदपाठके विप्रे ।

**आदंश** पु० आ+दन्श–भावे घञ् । दंशने । “आदंशः सर्वलूतानामेतदादंशलक्षणम्” सुश्रु० । आदंशश्च दन्तादि साध्यव्यापारभेदः । आदश्यते अत्र आधारे घञ् । २आदंशस्थाने ‘आदंशं स्वेदितं चूर्णैः प्रच्छितं प्रतिसारयेत्” सुश्रु० । करणे घञ् । ३दन्ते

**आददि** त्रि० आ+दा–कि द्वित्व । आदानकर्त्तरि ‘वीलु द्वेषा अनुवश ऋणमाददि” ऋ० २,२४,१३ ।

**आदर** पु० आ+दृ–अप् । १गौरवहेतुके कर्म्मणि सम्माने, । “न जातहार्द्देन न विद्विषादरः” किरा० “दरादराभ्यां दरकम्पिनी पपे” नैष० । “तद्दर्शनादभूच्छम्भोर्भूयान् दारार्थमादरः” कुमा० । २आरम्भे ३आसक्तौ । “तां प्रणामादरस्रस्तजाम्बूनदविभूषणाम्” कुमा० । ४यत्ने च “ग्रहयन्त्रपताकाश्रीरपौरादरनिर्मिता” कुमा० ।

**आदरणीय** त्रि० आ+दृ–अनीयर् । सम्माननीये । तव्य । आदर्त्तव्योऽप्यत्र त्रि०।

**आदर्श** पु० आदृश्यतेऽत्र दृश–आधारे घञ्। १दर्पणे, तत्र हि बिम्बपदार्थस्य प्रतिबिम्बपतनात्, तत्संयोगेन नयनरश्मीनां परावर्त्तने वा बिम्बग्राहितया बिम्बं दृश्यते इति तस्य तथात्वम् । “आदर्शबिम्बस्तिमितायताक्षी” कुमा० नेपथ्यदर्शिनश्छाया तस्यादर्शहिरण्मये” रघुः । आदृश्यते सम्यग्रूपेण ज्ञायते ग्रन्थार्थोऽस्मिन् । टीकायां २प्रतिरूपपुस्तकादौ यत्रत्यमक्षरसन्निवेशं दृष्ट्वा तदनुरूपमन्यल्लिख्यते तादृशे पुस्तके । ‘यथादर्शं तथा लिखितमिति भूरिप्रयोगः । आदर्शोगुणानाम् काद० । तत्र तदीयगुणान् दृष्ट्वा परैस्तथागुणा आश्रीयन्त इति तस्य तथात्वम् ४जनपदसीमाभेदे च । ततोभवादौ वुञ् । आदर्शकः । जनपदावधिसूचकस्थानभवे त्रि० ।

**आदर्शमण्डल** पु० आदर्शइव मण्डलमस्य । आदर्शाकार मण्डलयुक्ते सर्पभेदे सर्पभेदानुक्त्वा । “मण्डलिनस्तु आदर्शमण्डलः श्वेतमण्डलः” इति सुश्रु०उक्तः । आदर्शोमण्डलमिव । २मण्डलाकारे दर्पणे न० ।

**आदहन** न० आ+दह–भावे ल्युट् । १दाहे २हिंसायां ३कुत्सने च । आदह्यतेऽत्र आधारे ल्युट् । ४श्मशाने । “अर्द्धमादहनं प्राप्य आसीनोदक्षिणामुखः” छन्दो०प० । “आदह्यतेऽस्मिन्निति आदहनं श्मशानम्” शु०त०रघु० ।

**आदातृ** त्रि० आ+दा–तृच् । ग्रहीतरि “दाता नित्यमनादाता सर्वभूतानुकम्पकः”या०आदाननित्याच्चादातुः”मनुः।

**आदादिक** त्रि० अदादिगणे पठितः ठक् । अदादिगणपठिते धातुभेदे । “आदादिकस्य ग्रहणं” सि०कौ० ।

**आदान** न० आ+दा–भावे ल्युट् । ग्रहणे । ‘कुशाङ्कुरादान परिक्षताङ्गुली” कुमा० । “आदानं हि विसर्गाय सतां वारिमुचामिव” रघुः । “आदानमप्रियकरं दानञ्च प्रियकारकम्” “आदाननित्याच्चादातुः” “निन्दितेभ्योधनादानं वाणिज्यं शूद्रसेवनम्” मनुः आदाने नियमविशेषाश्च स्मृतौ दर्शिताः । “भूमेः प्रतिग्रहं कुर्य्याद्भूमेः कृत्वा प्रदक्षिणम्”। विष्णुध० । प्रदक्षिणं न सर्व्वस्या भूमेः किन्तु तत्रस्थायाः प्रदक्षिणावर्त्तनमात्रं भूमेरसन्निधाने तामुद्दिश्य प्रदक्षिणम् रघु०तत्रैव ।“करे गृह्य तथा कन्यां दासदास्यौ द्विजोत्तमाः ! । करन्तु हृदि विन्यस्य धर्म्मंग्राह्यो यः प्रतिग्रहः । आरुह्य च गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः। तथाचैकशफानान्तु सर्व्वेषामविशेषतः । प्रतिगृह्णीत गां पुच्छे पुच्छे कृष्णाजिनं तथा । आरण्याः पशवस्तान्ये ग्राह्याः पुच्छे विचक्षणैः । प्रतिग्रहमयोष्ट्रस्य आरुह्य च तथा चरेत् । बीजानां मुष्टिमादाय रत्नान्यादाय सर्व्वतः ।